**तूष्णीकाम्** अव्य॰ तूष्णीम्+अकच्प्रकरणे तूष्णीमः काम् वक्तव्यः” वार्त्ति॰ काम् मित्त्वादन्त्यादचः परः। तूष्णीं शब्दार्थे। “तूष्णीकामास्ते” सि॰कौ॰।

**तूष्णीङ्गङ्ग** अव्य॰ तूष्णीं गङ्गा यत्र “अन्यपदार्थे च संज्ञायाम्” पा॰ बहुव्रीह्यर्थे अव्ययी॰। १देशभेदे। “अपां ह्रदं च पुण्याख्यं भृगुतुङ्गं च पर्वतम्। तूष्णीगङ्गं च कौन्तेय! सामात्यः समुपस्पृश” भा॰व॰ १२५ अ॰। तूष्णीङ्गङ्गे इत्यत्र सप्तम्या वा न अम।

**तूष्णीम्** अव्य॰ तूष बा॰ नीम् स्वरादि। १मौने(चुपकरा) अमरः। “यत्किञ्चित् दश वर्षाणि सन्निधौ प्रेक्षते धनी। भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति” मनुः “परैर्वा कीर्त्यमानेषु तूष्णीमास्ते पराङ्मुखः” भा॰शा॰१०३ अ॰। तूष्णींशब्दे उपपदे “तूष्णीमि भुवः” क्त्वाणमुलौ तूष्णींभूय तूष्णीं भावम्। “तूष्णींभूय भयादासाञ्चक्रिरे मृगपक्षिणः” भट्टिः। क्त्वा च इति” पा॰ वा समासाभावे तूष्णीं भूत्वा।

**तूष्णीभाव** पु॰ तूष्णीम्+भू–घञ्। तूष्णींभवने मौनावलम्बने “अनिमिषनयननिरीक्षणे तूष्णींभावादयस्तत्र” सा॰ द॰ “तूष्णींभावेऽपि विज्ञेयं न चेद्भवति कारणम्” भा॰ शा॰१०३ अ॰।

**तूस्त** न॰ तुस–बा॰ तन् दीर्घश्च। १रेणौ। २जटायाञ्च मेदि॰ ३पापे ४सूक्ष्मे च शब्दच॰।

वि+तूस्त–णिच्। तूस्तस्य हनने। वितूस्तयति तूस्तं केश इत्येके जटीभूताः केशा इत्यन्ये पापमित्यपरे सि॰कौ॰।

**तृंहण** न॰तृहि–भावे ल्युट्। हिंसने। [वा तत्र पाठः तत्रार्थे।

**तृक्कन्** पुंस्तने निघण्टुः रिक्केत्यत्र पाठान्तरम् तृक्का त्रिकेति

**तृक्ष** गतौ भ्वा॰ पर॰सक॰ सेट्। तृक्षति अतृक्षीत् ततृक्ष।

**तृक्ष** पु॰ तृक्ष–अच्। काश्यपे ऋषौ तस्यापत्यं गर्गा॰ यञ्। तार्क्ष्य गरुडे अरुणे विहगमात्रे च तार्क्ष्यशब्दे दृश्यम्

**तृक्षाक** पु॰तृक्ष–आकन्। ऋषिभेदे ततोऽपत्ये शिवा॰ अण्। तार्क्षाक तदपत्ये।

**तृक्षि** पु॰ तृक्ष–इन्। त्रसदस्योः पुत्रे ऋषिभेदे। “येभिस्तृक्षिं वृषणा त्रासदस्यवम्” ऋ॰ ८।२२।७। “त्रासदस्यवं त्रसदस्योः पुत्रं तृक्षिमेतन्नामकम्” भा॰।

**तृख** न॰ तृष–क पृषो॰। जातीफले।

**तृ(तृ)च** न॰ तिसृणामृचां समाहारः तिस्र ऋचो यत्र वा अच्समा॰ वा सम्प्रसारणम्। १समानदेवताकानां समानच्छन्दस्कानामृचां त्रये २तद्युक्ते अनुवाकसूक्तादौ त्रि॰। “मधुवाता तृचं जपेत्” हेमाद्रिश्राद्धकल्पः। “याश्चोषधीरिति तृचैर्वपत्युदपात्रवत्” कात्या॰ श्रौ॰ १७।३।८। सूक्तपरत्वे न॰ “गायत्रं तृचं दश त्रयीषु विद्यते” निरु॰ १२।४०। वा संप्रसारणाभावे त्र्यृचमप्यत्र।

**तृण** भक्षे तना॰ उभ॰ सक॰ सेट्। तृणोति तर्णोति तृणुते तर्णुते। अतर्णीत् अतर्णिष्ट। उदित् तर्णित्वा तृण्ट्वा।

**तृण** न॰ तृह–नक् हलोपश्च। १नडादौ, खटे (खड़)। अमरः। “तृणेन वात्येव तयाऽनुगम्यते” नैष॰। “लघुर्वेद्धतृणं नरः” माघः। तृणस्यायं शिवा॰ अण्। तार्ण तृणजन्ये वह्नौ पु॰ “तार्णतार्णभयं नास्तीति” जगदीशः। तृणसम्बन्धिमात्रे त्रि॰। घोषादि॰ उत्तरपदस्थे तृणशब्दे पूर्वपदमाद्युदात्तम्। ग्रामतृणमित्यादि। समूहार्थे पाशा॰ य। तृण्या तृणसमूहे स्त्री तत्र भवः। उत्करा॰ मत्वर्थे छ नडा॰ कुक् च। तृणकीय तृणभवे त्रि॰।

स्वल्पं तृणं कन्। तृणक स्वल्पतृणे “क्षीणोष्वेतास्तृणकेनापि राजन्!” भा॰आ॰८३ अ॰। स्वार्थे क। तत्रार्थे।

**तृणकर्ण** पु॰ तृणमिव कर्णोऽस्य। ऋषिभेदे ततः शिवा॰ अपत्यादौ अण्। तार्णकर्ण तद्गोत्रापत्ये। यस्का॰ बहुषु अणो लुक्। तृणकर्णास्तद्गोत्रापत्येषु ब॰ व॰।

**तृणकाण्ड** न॰ तृणानां समूहः दूर्वा॰ काण्डच्। तृणसमूहे

**तृणकुङ्कुम** न॰ तृणजातं कुङ्कुमम्। सुगन्धद्रव्यभेदे राजनि॰। “तृणकुङ्कुमं कटूष्णं कफपित्तविनाशनम्। वातशोकपामकण्डूकुष्ठामदोषनाशनम्। परमं भास्वरं तत्तु भिषग्भिः परिकीर्त्तितम्” राजनि॰ तद्गुणा उक्ताः।

**तृणकुटी** स्त्री तृणाच्छादिता कुटी शा॰त॰। तृणाच्छादिते गृहे त्रिका॰। तृणकुटीरादयोऽप्यत्र (कुड़ेघर)।

**तृणकूर्म्म** पु॰ तृणमयः कूर्म्मः। तूम्बरां शब्दमा॰।

**तृणकेतु** पु॰तृणेषु केतुरिव श्रेष्ठत्वात् असारत्वाद्वा। १वंशवृक्षे, २तालवृक्षे, तृणद्रुमतृणध्वजावप्यत्र। राजनि॰। स्वार्थे क। तत्रार्थे।

**तृणगण्ड** पु॰ तृणमिव गण्डोऽस्य। उच्चिङ्गटे (उच्चिङ्गड़ा) कीटभेदे मेदि॰। [२तृणजलौकायाञ्च।

**तृणगोधा** स्त्री तृणमिव गोधा। १गोधाकृकलासे मेदि॰

**तृणगौर** न॰ तृणमिव गौरं पीतम्। तृणकुङ्कुमे राजनि॰।

**तृणग्रन्थि** स्त्री तृणमिव ग्रन्थिरस्य। स्वर्णजीवन्त्याम् राज॰

**तृणग्राहिन्** पु॰ तृणं गृह्णाति ग्रह–णिनि ६त॰। नीलमणौ राजनि॰।